# Shivaproktam Kashikshetramahatmyavarnanam

# शिवप्रोक्तं काशीक्षेत्रमाहात्म्यवर्णनम्

## Document Information

Text title : Shivaproktam Kashikshetramahatmyavarnanam

File name : shivaproktaMkAshIkShetramAhAtmyavarNanam.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 29

shivagaurIsaMvAde kAshIprabhAvakathanam | 731-782||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

# शिवप्रोक्तं काशीक्षेत्रमाहात्म्यवर्णनम्

(शिवरहस्यान्तर्गते उग्राख्ये)
(शिवपार्वतीसंवदे)
काशीवासोऽभवत्पूर्वं साक्षान्मुक्तिप्रदायकः ।
पश्य पाशुपतान्वृद्धान् भस्मरुद्राक्षभूषणान् ॥ ७३१॥

एते पाशुपताः शुद्धाः काशीं पाशुपतस्थलीम् ।
महापद्यपि घोराढ्यां (घोरायां) न त्यजिष्यन्ति
(नैव त्यक्ष्यन्ति) सुव्रताः ॥ ७३२॥

असङ्ख्येया हि ते सर्वे मल्लिङ्गार्चनतत्पराः ।
ममैवाराधनं कृत्वा तिष्ठन्त्यत्र मुमुक्षवः ॥ ७३३॥

पश्यैतान्भस्मदिग्धाङ्गान् रुद्राक्षाभरणप्रियान् ।
अनर्घ्यार्घ्यकरान्धन्यान्मन्नामस्मरणोत्सुकान् ॥ ७३४॥

महादेवेत्ति मामुच्चैर्वदतः प्रीतिपूर्वकम् ।
कथमेते समायान्ति पश्य पश्य वरानने ॥ ७३५॥

एतदुच्चरितः श्राव्यो महादेवेत्ययं ध्वनिः ।
अमृताम्मृतभूतो यः शिवे रुचिकरो मम ॥ ७३६॥

महादेवेति पीयूषं पिबन्तीव पुनः पुनः ।
पश्यं पश्य पुनः प्रीत्या महादेवेति वादिनः ॥ ७३७॥

नानादिग्भ्यः समायान्ति पश्य पाशुपतोत्तमान् ।
अर्घ्यहस्तान्महादेवेत्युच्चैरुच्चरतो मुदा ॥ ७३८॥

कथं भान्ति शुचिर्भूत्वा (पूतात्मानः कथं भान्ति)
भस्मभासितविग्रहाः ।
सर्वेऽप्येते भस्मफाला मम पारिषदाः शिवे ॥ ७३९॥

मदर्चनं विनैतेषामन्यत्कार्यं न दृश्यते ।
एते कालत्रयेऽप्येवमागत्याभ्यर्चयन्ति माम् ॥ ७४० ॥

शिवे पश्य महाशैवान् मुक्तिमण्टपसंस्थितान् ।
पञ्चाक्षरजपासाक्तान् मल्लिङ्गालोकनोत्सुकान् ॥ ७४१ ॥

रुद्राध्यायजपासक्तान्पश्य शैवान् गिरीन्द्रजे ।
ध्यायन्ति यामजं नित्यं पश्यैतान् शैवपुङ्गवान् ॥ ७४२ ॥

एते नृत्यन्ति शैवेन्द्रा मामभ्यर्च्य यथाविधि ।
साष्टाङ्गं प्रणमन्त्येते शतधा पश्य तान् शिवे ॥ ७४३ ॥

कर्पूरदीपान्धृत्वैते नामानि शुभदानि मे ।
गायन्त्येते गानलोलं विदित्वा मामजं शिवे ॥ ७४४ ॥

सर्वेऽप्येते नित्यतृप्ता नित्यानन्दा निरामयाः ।
ध्यायन्ति सच्चिदानन्दं मामेवैते मुदा सदा ॥ ७४५ ॥

मत्कथाऽऽकर्णनासक्ता निर्वाणपदवाञ्छया ।
तिष्ठन्त्यत्रानिशं देवि मामेव शरणं गताः ॥ ७४६ ॥

पश्य पश्य गणान्देवि भैरवादीन्विलोकय ।
सेवन्ते मामजं नित्यमनन्तविजयान्विताः ॥ ७४७ ॥

सर्वान्सुराधिपान्पश्य मदर्चनपरायणान् ।
पुरात्र कार्तिके मासि चतुर्दश्यां सुराः शिवे ॥ ७४८ ॥

सायङ्काले समागत्य पूजां कृत्वा स्थिता मुदा ।
तदा दधीचिरर्घ्याद्यैर्मामभ्यर्च्य प्रयत्नतः ॥ ७४९ ॥

सत्वरं गन्तुमुधुक्तः स महार्हमहास्तदा ।
तदातु मुनयः सर्वे बहवस्तेन सङ्गताः ॥ ७५० ॥

गन्तुं समुद्यता देवि सम्मर्दोऽभूत्तदा बहु ।
ततः परमृषिगणाः सर्वे सम्पूज्य मां निशि ॥ ७५१ ॥

भक्त्या जागरणं चक्रुः शृण्वन्तो मत्कथां शिवे ।
कार्तिकस्य चतुर्दश्यां बिल्वैश्च कनकाह्वयैः ॥ ७५२ ॥

द्रोणपुष्पैश्च ते पूजां चक्रुर्मम महेश्वरि ।
तिलैः ससर्षपैः शुक्लैश्चक्रुः पूजां मयि प्रिये ॥ ७५३ ॥

कृष्णगोघृतदीपानां मह्यं सार्धं शतत्रयम् ।
दत्तं क्षीरान्नमाज्याक्तं दत्तं मह्यं वरानने ॥ ७५४॥

धूपदीपौ पुनर्दत्तौ दत्तः पुष्पाञ्जलिस्ततः ।
प्रदक्षिणनमस्कारान्कृत्वा च तदनन्तरम् ॥ ७५५॥

रात्रिर्नीता प्रयत्नेन मत्कथाश्रवणादिभिः ।
ततोऽरुणोदये जाते स्नात्वा तीर्थेऽथ भस्मना ॥ ७५६॥

त्रिपुण्ड्रधारणं कृत्वा कृत्वा रुद्राक्षधारणम् ।
सन्ध्यां समाप्य विश्वेशं समभ्यर्च्य यथाविधि ॥ ७५७॥

मद्भतान्भोजयामासुरन्नैर्नानाविधैः शुभैः ।
यः शुक्लोर्जचतुर्दश्यामुपोष्य प्रयतः शिवे ॥ ७५८॥

मामर्चयति विश्वेशं स मुक्तो भवति ध्रुवम् ।
मल्लिङ्गपूजनं पुण्यं सर्वदा सर्वकामदम् ॥ ७५९॥

ऊर्जशुक्लचतुर्दश्यां अर्चितं बहुपुण्यदम् ।
कार्तिकस्य चतुर्दश्यां सितायां मां प्रयत्नतः ॥ ७६०॥

यः पूजयति पुण्यात्मा स मुक्तो नात्र संशयः ।
इदं विश्वेश्वरं लिङ्गं साक्षान्मद्रूपमुत्तमम् ॥ ७६१॥

को वा नातिप्रयत्नेन समाराधयति प्रिये ।
अस्य लिङ्गस्य माहात्म्यं वेदैर्नज्ञायते शिवे ॥ ७६२॥

न विष्णुना ब्रह्मणा वा किं तु तज्ज्ञायते मया ।
माहात्म्यं ज्ञातुमेतस्य वेदैस्तप्तं तपः पुरा ॥ ७६३॥

विष्णुनापि तपस्तप्तं ब्रह्मणापि वरानने ।
एते तप्त्वा महाघोरं बहुकालं प्रयत्नतः ॥ ७६४॥

ततस्तत्वमविज्ञाय विरतास्तपसः शिवे ।
एतादृशमिदं लिङ्गं सर्ववेदान्तसंस्तुतम् ॥ ७६५॥

सुरासुरार्चितं लिङ्गं नानामुनिवरार्चितम् ।
मम लिङ्गमिदं देवि पूजितं भुक्तिमुक्तिदम् ॥ ७६६॥

पूजयस्वाद्य यत्नेन नवबिल्वदलादिभिः ।

अभिषेचय मल्लिङ्गं क्षीराद्यैर्भक्तिपूर्वकम् ॥ ७६७॥

ततोऽस्य कुरु लिङ्गस्य कपूराधनुलेपनम् ।
ततो मन्दारकुसुमैर्बिल्वपत्रैश्च कोटिशः ॥ ७६८॥

सम्पूज्य कुरु नैवेद्यं सघृतं क्षीरमुत्तमम् ।
कृत्वा प्रदक्षिणादीनि लिङ्गध्यानं कुरुष्व मे ॥ ७६९॥

नित्यमेतस्य लिङ्गस्य भक्ति कुरु मनोरमे ।
दृष्ट्वेदं लिङ्गममलं सर्वेऽप्यभ्यर्चयन्त्यतः ॥ ७७०॥

प्रिये त्वमपि यत्नेन कुरु मल्लिङ्गपूजनम् ।
ममापि जायते भक्तिर्मल्लिङ्गाभ्यर्चने शिवे ॥ ७७१॥

दृष्ट्वेदं लिङ्गममलं को वा नाभ्यर्चयिष्यति ।
मम प्रियतरं लिङ्गं सर्वदेवस्तुतं प्रिये ॥ ७७२॥

इदं लिङ्गं स्वप्रकाशमेतद्भासैव केवलं ।
विभाति सर्वमेतद्यद्दृश्यते सचराचरम् ॥ ७७३॥

नेदं विभासयत्यर्को न भासयति चन्द्रमाः ।
न तारका भासयन्ति विद्युतोऽपि कुतोऽनलः ॥ ७७४॥

एतादृशमिदं लिङ्ग अविकारं मदात्मकम् ।
द्रष्टव्यमर्चनीयं च ध्यातव्यं च प्रयत्नतः ॥ ७७५॥

सर्वोऽपि पुण्यकालोऽत्र काश्यां मल्लिङ्गपूजने ।
व्यतीपातादयो योगाः भवन्त्यपि वरानने ॥ ७७६॥

सादरं प्रतिगृह्णामि मद्भक्तकृतपूजनम् ॥ ७७७॥

- -

सूतः (उवाच)
इति श्रीविश्वनाथस्य श्रुत्वा वचनमम्बिका ।
भक्त्या वैश्वेश्वरं लिङ्गं पूजयामास चेश्वरी ॥ ७७८॥

ततस्तस्मिन्महालिङ्गे सर्वदेवशिखामणिः ।
उमया सह सम्प्रीतश्चकार वसतिं शिवः ॥ ७७९॥

तदेव लिङ्गमधुना ब्रह्मविष्ण्वादिभिः सुरैः ।
सर्वदा पूज्यते भक्त्या श्रीमहेशगणैरपि ॥ ७८०॥

श्रीमद्विश्वेश्वरं लिङ्गमानन्दघनमद्वयम् ।
श्रुतं स्मृतं वा दृष्टं वा भुक्तिमुक्तिप्रदं ध्रुवम् ॥ ७८१॥

श्रीमद्विश्वेश्वरं लिङ्गं प्रसङ्गादपि संश्रुतम् ।
चतुर्वर्गप्रदं विप्राः सत्यं सत्यं मयोच्यते ॥ ७८२॥

॥ इति शिवरहस्यान्तर्गते शिवपार्वतीसंवदे शिवप्रोक्तं काशीक्षेत्रमाहात्म्यवर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २९ शिवगौरीसंवादे काशीप्रभावकथनम् । ७३१-७८२॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam . 731-782..

Notes:
Śiva शिव, while showing around Kāśī काशी to Pārvatī पार्वती, tells Her about the Pāśupatas पाशुपताः who reside there while worshiping Him. He mentions about the merits of worshiping His Śivaliṅga शिवलिङ्ग in Kāśī काशी, especially during the Ūrja Śukla Caturdaśī ऊर्ज शुक्ल चतुर्दशी / Kārtika Sita Caturdaśī कार्तिक सित चतुर्दशी and that all times are benefic for worshiping His Śivaliṅga शिवलिङ्ग apart from (malefic ones like) Vyatipāta Yoga व्यतिपात योग.

Proofread by Ruma Dewan

*Shivaproktam Kashikshetramahatmyavarnanam*

pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*